International Journal of Applied Research 2021; 7(2): 248-249




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2021; 7(2): 248-249
www.allresearchjournal.com
Received: 07-12-2020
Accepted: 11-01-2021

**दिपेश कुमार चौधरी**
शोधार्थी, का. सिं. द. सं. वि. वि., कामेश्वरनगर, दरभंगा, बिहार, भारत

**Corresponding Author:**
**दिपेश कुमार चौधरी**
शोधार्थी, का. सिं. द. सं. वि. वि., कामेश्वरनगर, दरभंगा, बिहार, भारत

# भट्टोजिदीक्षितस्य देशकालादीनां परिचय

**दिपेश कुमार चौधरी**

**प्रस्तावनाः**
आचार्येण भट्टोजिदीक्षितेन पाणिनीयव्याकरणे प्रक्रियानुसारिणी अत्युपयोगिनी टीका प्रणीता या 'सिद्धांतकौमुदी' नाम्ना प्रसिद्धाऽस्ति। एतन्निर्माणात् पूर्व धर्मकीर्तिना कृते रूपावतारे, विमल सरस्वतीकृत रूपमालायाम्, रामचन्द्रस्य प्रक्रियाकौमुद्यादिषु पाणिनीयाष्ठध्यायाः समस्त सूत्राणां सन्निववेशो नासीत्। एतन्वैन्यून्य परिहाराय भट्टोजिदीक्षितेन सिद्धांतकौमुद्या रचना कृता। साम्प्रतं समस्ते भारते पाणिनीयव्याकरणस्थाश्यनाश्यापनादिकं सिद्धांतकौमुद्या आधारेणैव प्रचलति।
भट्टोजिदीक्षि महाराष्ट्रीय ब्राह्मण आसीत्। अस्य पितुर्नाम श्रीलक्ष्मीधर दीक्षित आसीत्। अस्य लघुः भ्राता श्रीरत्रेजिभट्ट आसीत्। अस्य वंशपरिचयः




भट्टोजिदीक्षितस्य कालविषये वर्तते वैभत्यं विदुषाम्। डॉ0 बेल्वलकर मतानुसारेण भट्टोजिदीक्षितस्य कालः सन् 1600–1650 वि अर्थात् 1657–1707 वैक्रमाब्दपर्यन्तं भवितुमर्हति। अन्येषां विदुषां मतानुसारेणस्य कालः 1637 वैक्रमाब्दे भवितुमर्हति। शेषकृष्ण प्रणीतप्रक्रिया कौमुदी प्रकाश व्याख्याया 1514 वैक्रमाब्दास्यैको हस्तलेखः पूनानगरस्य भण्डारकर ओरियण्टलरिसर्च इन्स्टीट्यूट संस्थायाः संग्रहालये समुपलभ्यते, यस्य लिपिकालः 1536 वैक्रमाब्दो वर्तते। शेषकृष्णस्य स्वर्गवासकालः 1525 वैक्रमाब्दमनुसृत्य भट्टोजिदीक्षितस्य कालः षोडशवैक्रमशतकस्य प्रथम दशतौ मन्तव्य इति युधिष्टिरमीमांसको व्याजहार।
प्रक्रियाग्रन्थेषु सर्वोच्चं स्थानं विभर्ति, श्री भट्टोजिदीक्षितकृता सिद्धांतकौमुदी। अत्र ग्रन्थे पाणिनीयाष्टाध्यायाः सर्वाण्यपि सूत्राणि प्रयोगसिद्धिदृष्ट्या सुव्यवस्थितानि तथा दृश्यन्ते यथा मालाकारो नैकविधपुष्पाणि यथायथं मालारूपेण ग्रहनाति। अत्र श्रीदीक्षित महोदयेन ग्रन्थान्तरेषु प्रसृतानां प्रयोगानां विचाराः प्रयोगसाधनावसरे कृताः साधु विजृशयन्ते येषां परिशीलनेन भाषाविषयकः समस्तः सम्देहसमूहो दूरीभवति अद्य, तु पाणिनीय व्याकरणस्य सम्पूर्णमपि क्षेत्रं सिद्धांतकौमुद्या क्रोडीकृतम् तदनन्तरं तत्र बहुभिर्विद्वादिर्विविधाष्टीकाः कृताः।
श्रीभट्टोजिदीक्षितमहोदयेन स्वयं सिद्धान्तकोमुद्याः व्याख्या प्रणीता, या 'प्रौढमनोरमा' इति नाम्ना प्रसिद्धाऽस्ति। अत्र तेन प्रक्रियाकौमुद्यास्तटीकनाञ्च स्थाने–स्थाने खण्डनं विहितम्।
श्रीमट्टोजिदीक्षितेन 'यथोत्तरं मुनीनां प्रामाण्यम्'' इत्यत्र महद् बलं प्रदन्तमस्ति। प्राचीनग्रन्थकारा अन्यवैयाकरणानां मतानामपि संग्रह कुर्वन्ति स्मः, किन्तु श्रीभट्टोजिदीक्षितेन प्रक्रियाया अस्या उच्छेद एव विहितः। अत आधुनिककालस्य पाणिनीया वैयाकरणा अर्वाचीनव्याकरणानां तुलनात्मकज्ञानेन सर्वथा वञ्चिता, सञ्जाता।
श्रीभट्टोजिदीक्षितेप्रणीतायाः प्रौढमनोरमायाः संवत् 1708 वैक्रऊमाब्दस्यैको हस्तलेखः पूनास्थ भण्डारकर प्राच्यविधाप्रतिष्ठाने वर्तते।

प्रौढमनोरमायां श्रीभट्टोजिदीक्षित पौत्रेण श्रीहरिदीक्षितेन लघुशब्दरत्न'– नाम्नी च व्याख्या प्रणीता। तत्रलघुशब्दरत्नं मुद्रितं सर्वत्र प्राप्यते परं बृहच्छब्दरत्नमिदानी' यावदमुद्रितमेवास्ति केचन विद्वांसो मन्यन्ते यन्नागेश भट्ट एव लघुशब्दरत्नं स्वयं शिलिख्य स्वगुरोर्नाम्ना प्रकाशितवान् लघुशब्दरत्नेऽप्यनेकैविद्वद्भिष्टीका विलिखिताः।

सम्वत् 1550–1600 वैक्रमाब्दमध्यकालस मुत्प'न्ने श्रीवामनेन्द्रसरस्वतिशिष्येण श्रीज्ञानेन्द्र सरस्वतिमहोदयेन सिद्धांतकौमुद्याः तत्वबोधिनी नाम्नी व्याख्या प्रणीता। ग्रन्थकारेणाऽत्र प्रायः प्रौटमनोरमाया एव संक्षेपो विहितः।

सम्वत् 1600–1675 वैक्रमाब्दामध्यकालसमुत्पन्नेन श्रीवामनेन्द्र सरस्वतिशिष्येन श्रीनीलकण्ठे वाजपेयिमहोदयेन तत्वबोधिन्याः गूढार्थदिपिका' नाम्नी टीका, सिद्धांत कौमुद्याश्च 'सुख बोधिनी' नाम्नी व्याख्या प्रणीता।

सम्भवत् 1680–1720 वैक्रमाब्दमध्यकालिकेन तात्कालिकोत्कृष्ट शैवविदुषा श्रीमशुकरात्रिपाठिनस्तुनूजेन श्रीरामानन्द नामाभिधेय विदुषा सिद्धान्तकौमुद्याः तत्त्वदीपिका' नाम्नी टीका, प्रणिता। सा सम्प्रति, हलन्तस्त्री लिंत्रे यादवदुपलभ्यते। प्रायेण सम्वत् 1715 वैक्रमदीयेन श्रीवौटाद्रि भट्टत्मज श्रीतिरूम लभट्ट तनूजेन श्रीराम कृष्णभट्ट नामाभिधेयविदुषा सिद्धांतकौमुद्याः 'रत्नाकर' नाम्नी टीका प्रणीता। अस्याः हस्तलेखः तञ्जीर राजकीयपुस्तकालये जामूस्थ रघुनाथ मन्दिरपुस्तकालये वर्तन्ते। जम्मूस्थ हस्तलेखेष्वेक स्यलेखनकालः संम्वत् 1744 वर्तते।[1] भण्डारकर प्राच्यविद्याप्रतिष्ठान पूनासंग्रहे, टीकाग्रन्थास्याऽसय चत्वारो हस्तलेखः प्राप्यन्ते[2]।

सम्भवत 1730–1810 वैक्रमाब्दमध्यकालिकेन श्रीनागेश भट्टनामाभिधेय विदुषा सिद्धांतकौमुद्याः बृहच्छब्देन्दु शेखर 'लघुशब्देन्दुशेखर' इत्याख्ये द्वे टीके प्रणीते। लघुशब्देन्दुशेखरेऽनेकाष्टीकाः विलिखिताः।

सम्वत् 1745 वैक्रमाब्दीयेन चोलदेशान्तरगतकरण्डमाणिक्यग्राम निवासिना श्रीरत्नाथ याज्वा नामाभिधेयविदुषा सिद्धांतकौमुद्याः 'पूर्णिमा नाम्नी टीका प्रणीता'[3]।

सम्वत् 1740–1800 वैक्रमाब्दमध्य कालिकेन, चोल (तञ्जौर) देशस्य भोसल–वंशीयशाहजीशरमजी तुक्को जीत्याख्या त्रयाणां राज्ञां मन्त्रिणः विदुषः सार्वभौम– आनन्द रामस्याऽध्वर्युणा श्रीमहादेववाजपेयि सूनुना श्री विश्वेश्वरवाजपेयिशिष्येण श्रीवासुदेववाजपेयि नामाभिधेय विदुषा विद्धांतकौमुद्याः 'बालमनोरमा नाम्नी टीका प्रणीता। टीकेयमतीव सरलेति कृत्वा छात्राणां कृतेऽतीवोपयोगिनी

श्रीदेवीदत्तात्मजश्रीरामसेवक पुत्रेण श्रीकृष्ण मित्र नामाभिधेयविदुषा सिद्धांतकौमुद्याः 'रत्नार्णवं' नाम्नी टीका प्रणीता यस्या उल्लेखः श्रीआफ्रेमहोदयेन स्वकीये वृहत्सूचीपत्रे विहितः।

सम्वत् 1847 वैक्रमाब्दीयेन शेषकुलोत्पन्नेन श्रीनागोजीपण्डितानां पुत्रेण श्रीरामचन्द्र पण्डितेन सिद्धांतकौमुधाः स्वरप्रक्रियांशय व्याख्या प्रणीता। जम्मूस्थ रघुनाथ मंदिर पुस्तकालये उपलबधे हस्तलेखऽन्तिम भागोऽधोलिखितः पाठ उपलभ्यते–

इति शेषकुलोत्पन्नेन नागोजीपण्डितानां पुत्रेण रामचन्द्रपण्डितेन विरचिता स्वरप्रक्रियाव्याख्या समाप्ता सम्वत् 1847 वैशखमासे शुक्ल पक्षे[4] 'वान शनैश्चर'।

प्रायेण सम्वत् 1700 वैक्रामदीयेन श्रीवौटाद्रिपुत्रेण श्रीतिरूमलद्वादशाहयाजिमहोदयेन सिद्धान्तकौमुद्याः सुमनोरमा' नाम्नीटीका प्रणीता। सुमनोरमाया एको हस्तलेखस्तञ्जौरपुस्तकालये[5] उपलभ्यते।

एतदतिरिक्तम्, सिद्धांतकौमुद्या अधोलिखितानां टीकानां हस्तलेखः तञ्जौरपुस्तकालये उपलभ्यन्ते–

1. तोप्वलदीक्षितकृता–प्रकाशटीका।
2. अज्ञातकर्तृकी– लघुमनोरमा।
3. अज्ञातकर्तृकी– शब्दसागर।
4. अज्ञातकर्तृकी– शब्दरसार्णव।
5. अज्ञातकर्तृकीसुधाऽञ्जन।

एतदतिरिक्तम्, श्रीलक्ष्मीन्सिंह नामाभिधेयविदुषा प्रणीतायाः 'विलास' नाम्न्याष्टीका हस्तलेखो मद्रासराजकीय पुस्तकालये समुपलभ्यते[6]। श्रीआक्रेरूप्यमहोदयेन स्वकीये बृहत्सूचीपत्रे सिद्धांतकौमुद्या अधोलिखितानां टीकानामुल्लेखो विहितः–

1. शिवरामचन्द्रसरस्वती– रत्नाकर टीका।
2. इन्द्रदत्तोपाध्याय–फक्किकाप्रकाशटीका।
3. सारस्वतव्यूढ़ मिश्र– बालबोधटीका।
4. वल्लभ– मानस रञ्जनी

अनेकैर्वैयाकरणेभट्टोजिदीक्षितेप्रणीतायाः प्रौढमनोमायाः खण्डने ग्रन्थाः प्रणीतः त्रयाऽनेकेषाम्महत्वपूर्णग्रन्थप्रणेतृणामृल्लेखोऽत्र विधीयते।

### 1. शेषवीरेश्वरपुत्रः (सम्वत्– 1575 वैक्रम)

श्री शेषवीरेश्वर (रामेश्वर) पुत्रेण 'प्रौढमनोरमा'' खण्डने एको ग्रन्थः प्रणीतः। अस्योल्लेखः पण्डितराजेनजगन्नाथेन प्रौढ मनोरमाखण्डने'' विहितः। तेनोक्तम्–

शेषवंशासतंसाना[7] श्रीकृष्णख्यापण्डितानां चिरायार्चितः योपादुकयोः प्रसादा दासादितशब्दानुशा सनस्तेषु च परमेश्वरं पदं प्रयातेषु कलिकालवशंवदी भवन्तस्तत्र भद्विरूल्लासितं प्रक्रिया प्रकाशमाशयाननबोधनिबन्ध नैर्दृषणैः स्वयं निर्मिताया मनारेमाया माकुल्यमकार्षः।

सा च प्रक्रियाप्रकाशकृतां पौत्ररखिलशास्त्रमहार्णवमन्यथा – चलायमज्ञनमानसानमस्मद् गुरु वीरेश्वर– पण्डितानां तर्नयैर्दूषिता अपि।''

श्रीशेषवीरेश्वरपुत्रास्य, तदग्रन्थस्य नाम न ज्ञायते। तेन प्रौढमनोरमाखण्डनेयो ग्रन्थः प्रणीतः, स सम्प्रति न प्राप्यते।

### 2. चक्रपाणिदत्त (सम्वत् 1500–1550) वैक्रम)

चक्रपाणिदत्तेन भट्टोजिदीक्षितप्रणीतायाः प्रौढमनोरमायाः खण्डने ''परमतखण्डनम'' इत्यभिधेय एको ग्रन्थः प्रणीतः। चक्रपाणिदत्तप्रणीतं प्रौढममोरमा खण्डनम् सम्पूर्णरुपेण सम्प्रति नोपलभ्यते।

### सन्दर्भ ग्रंथ सूची


1. तञ्जीर राजकीयपुस्तकालये जामूरथ रघुनाथ मन्दिरपुस्तकालये वर्तन्ते।
2. भण्डारकर प्राच्यविद्याप्रतिष्ठान्, पूनानगरे।
3. सिद्धान्तकोमुद्याः 'पूर्णिमा नाम्नी टीकायाम्'।
4. व्याकरणशास्त्रेतिहासे।
5. तञ्जीर राजकीयपुस्तकालये जामूरथ रघुनाथ मन्दिरपुस्तकालये वर्तन्ते।
6. मद्रासराजकीय पुस्तकालये।
7- शेषवीरेश्वरस्य प्रौढ़मनोरमाखण्डने।